# ParameshvaradevasamagamavarNanam from Shrikanthacharitam

# શ્રીકણ્ઠચરિતે પરમેશ્વરદેવસમાગમવર્ણનમ્

## Document Information

Text title : Parameshvaradevasamagamavarnanam from Shrikanthacharita

File name : parameshvaradevasamAgamavarNanam.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrImaNkhakakavikRitaM shrIkaNThacharitam | saptadashaH sargaH ||

Latest update : Ocober 7, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2023

*sanskritdocuments.org*

# શ્રીકણ્ઠચરિતે પરમેશ્વરદેવસમાગમવર્ણનમ્

ગલ્વર્કક્ષિતિતલબિમ્બતાર્કબિમ્બપ્રત્યુપ્તપ્રતિનવરત્નપાદપીઠામ્ ।
ચૂડેન્દુપ્રવિસૃમરાચ્છરશ્મિજાલૈરુન્નમીલસદ્ધવલવિતાનપૌનરુક્ત્યામ્ ॥ ૧॥

આસ્થાનીમચરમસાન્ધ્યકર્મસિદ્ધેઃ સાસૂયં ગિરિસુતયા વિલોક્યમાનઃ ।
દેવોઽથ ત્રિપુરપુરન્ધ્રિલોકલીલાવાહ્લીકસ્તવકમલિમ્લુચો વિવેશ ॥ ૨॥

નૈર્મલ્યપ્રવિશદહસ્કરાંશુકાણ્ડૈરુચ્ચણ્ડદ્વિગુણિતહેમવેત્રદણ્ડામ્ ।
બંહિષ્ઠૈરપિહિતબન્દિવૃન્દનાદામુદ્બર્જન્મુકુટસરિત્તરઙ્ઘોષૈઃ ॥ ૩॥

ભ્રશ્યદ્ભિર્નમદમરેન્દ્રમૌલીરત્નૌર્નિર્યત્નપ્રકટિતનૂતનોપકારામ્ ।
વેલ્લદ્ભિર્ગુહશિખિનઃ શિખણ્ડખણ્ડૈરારબ્ધપ્રવિતતતાલવૃન્તવૃત્તામ્ ॥ ૪॥

બિભ્રાણો વપુરહિમાલિ લુપ્તતાપં પ્રત્યુપ્તામખિલગણૈર્દિવાદિસારામ્ ।
આશ્ચર્યં ચરિતમુદઞ્ચયન્નપૂર્વાં શર્વાણીદયિતતમઃ સભામવાપત્ ॥ ૫॥

સસ્ફારસ્ફટિકવિરઙ્કુટ્ટિમાન્તઃસઙ્ક્રાન્તાખિલતનુભિર્ગણાનામ્ ।
પાતાલસ્થટલધિરુહ્ય મૂર્ધ્નિ ભક્તેરુત્સેકાત્સતતમિવોહ્યમાનપાદઃ ॥ ૬॥

નેત્રાગ્નિજ્વલનવિરીયમાનચૂડાખણ્ડેન્દુસ્રવદમૃતોપજાતજીવાન્ ।
ભૂયોઽપિ પ્રમુપિતસમ્પદો નૃમુણ્ડન્કુર્વાણઃ શ્વસિતવિષેણ કઙ્કણાહેઃ ॥ ૭॥

ચિન્વાનો દૃઢતરમહ્યુપોઢભારં પાદાબ્જદ્વિતયમિવોચ્ચજૂટબન્ધમ્ ।
ગ્રીવાયા વલયમિવાન્વહં દધાનો દોર્દણ્ડં શ્રિતવિષમાંસલસ્વરૂપમ્ ॥ ૮॥

વ્યગ્રાણાં ચટુઘટનાસુ વીક્ષમાણો નેત્રાન્તૈર્વદનમમર્ત્યમાગધાનામ્ ।
નાથોઽથ પ્રમથસભાં પ્રપદ્ય તસ્થાવાસીનઃ શિરસિ વિલાસવિષ્ટરસ્ય ॥ ૯॥

મારારૈર્મરકતવિષ્ટરપ્રભાણામભ્યઙ્ગાદનુસૃતનીલિમોદ્ગમાનિ ।
સર્વાઙ્ગાણ્યભિનવભૂતિમૂષણાન્યપ્યાસેદુઃ સહચરતાં ગલસ્થલસ્ય ॥ ૧૦॥

મિથ્યૈવ વ્યધિષત તસ્ય પાદપીઠં સોત્કણ્ઠાઃ પરિચરિતું પુરો ભુજિષ્યાઃ ।
નમ્રાણાં ચિકુરભરા હિ નિર્જરાણાં તત્કૃત્યગ્રહણમનુક્રમેણ ચક્રુઃ ॥ ૧૧॥

સાવેગં કથમપિ તસ્ય નોપશલ્યે કિઙ્કર્યો વિદુધુવુરગ્રચામરાણિ ।
ચૂડેન્દુગ્લનકૃતો વિશઙ્ક્ય પાત્રં લાલાટજ્વલનમકાણ્ડતાણ્ડવસ્ય ॥ ૧૨॥

હેરમ્બો નિજપિતુરાપ્ય જૂટકૂટેણાઙ્કું વિનિદધદન્યદન્તધામ્નિ ।
અભ્યઙ્ગાદથ પૃથુતત્કરચ્છટાનાં ત્રુટ્યન્તં પ્રકૃતમપિ વ્યધત્ત દન્તમ્ ॥ ૧૩॥

પ્રાવિક્ષન્નથ શનકૈરકૈતવેન વ્યઞ્જન્તો વિનયાવિનમ્રતાં શિરોભિઃ ।
સર્વેઽપિ ત્રિદિવસદો નિવેદ્યમાનાઃ સાવજ્ઞં કિમપિ શિલાદનન્દનેન ॥ ૧૪॥

દૂરાત્તે તદનુ સુધાન્ધસો વિવબ્રુઃ સંહત્ય પ્રણતિમયુગ્મલોચનાય ।
તત્પાદૌ વિરચયતાં હિ મૌલિભૂમૌ સ્વાન્મૌલીઞ્જગદપિ પાદુકીકરોતિ ॥ ૧૬॥

ચણ્ડાંશુજ્વલનતુષારધામમય્યોઽપ્યવ્યાજં પુરરિપુણા વિકીર્યમાણાઃ ।
દૃગ્લેખા બત વપુષોઽખિલામરાણાં સન્તાપં જડિમપરિગ્રહં ચ જહ્રુઃ ॥ ૧૬॥

ઔચિત્યાન્નિજનિનમાસનં ભજન્તસ્તે પૃષ્ટાઃ કુશલમથેન્દુશેખરેણ ।
ઇત્યૂચુર્નમુચિભિદાદયઃ સુધાયાઃ સમ્બન્ધાદિવ મધુરોદ્ગમૈર્વચોભિઃ ॥ ૧૭॥

વિશ્વેષાં પુરિ પુરિ યત્સદૈવ શેષે વિદ્વદ્ભિઃ પુરુષ ઇતિ પ્રતીયસે તત્ ।
કિં ધામત્રિતયમયાનપાયદૃષ્ટેસ્તસ્માત્તે જગતિ પરોક્ષમસ્તિ વસ્તુ ॥ ૧૮॥

નન્વેવં કિમપિ વિનિર્મલં પ્રકૃત્યા ત્વદ્રૂપં સુરસરિદમ્બુવત્પુનીતે ।
સ્રોતોભિસ્ત્રિભિરથ કારણાત્મભિસ્તદ્વિશ્વાત્મન્કૃતકમપિ વ્યનક્તિ ભેદમ્ ॥ ૧૯॥

ધિઙ્મૂઢા વિતથમુદાસનસ્વભાવં ભાષન્તે પુરુષ તવ ત્રિલોકભર્તુઃ ।
કર્ત્રી ચેત્પ્રકૃતિરિયં કરોતુ કિઙ્ચિત્કૈવલ્યં ભવદધિરોહમન્તરેણ ॥ ૨૦॥

કિં મિથ્યા હર મહદાદિષુ પ્રયુઙ્ક્તે લોકોઽયં વિકૃતિમયેષુ તત્ત્વશબ્દમ્ ।
એકસ્ત્વં નિરુપધિરૂપભૃદ્ધિ તથ્યં તત્તત્ત્વં પુરુષ બિભર્ષિ પઞ્ચવિંશઃ ॥ ૨૧॥

કિં કર્તું તવ પુરતોઽથ કિં નુ વક્તું શક્ષ્યામઃ ક્ષિતિધરરાજમૂર્ધશાયિન્ ।
ત્વં ખણ્ડં ક્વચિદપિ નો પદં વ્યનક્ષિ ત્રૈલોક્યં ધ્વનિવપુષશ્ચ તે વિવર્તઃ ॥ ૨૨॥

કુત્રાપિ પ્રતિહતિમેતિ નાન્તારિક્ષં શબ્દસ્તદ્ગુણપદવીં ન ચાતિશેતે ।
તન્મૂર્તિસ્ત્વમસિ ચ તદ્વિભો જગન્તિ વ્યાપ્નોષીત્યમુપપત્તિસમ્પ્રદાયઃ ॥ ૨૩॥

નો કિઞ્ચિદ્બહિરૂપપત્તિમેતિ વસ્તુ જ્ઞાનાત્તત્પ્રસરતિ કિં તુ ચિત્રવૃત્તિ ।
જ્ઞાનાત્મા પ્રભુરિતિ વિશ્વકર્તૃભાવો નો બૌદ્ધૈરપિ ભવતો બત વ્યપાસ્તઃ ॥ ૨૪॥

શૂન્યં તૈરકથિ ન તુચ્છમેવ રૂપં માદૃક્ષાનધિગમનીયવૃત્તિ કિં તુ ।
તાદૃક્ષં તવ ચ વપુસ્તથા ચ બૌદ્ધાસ્ત્વામેવ ક્વ ન પરમાર્થતો ગૃણન્તિ ॥ ૨૫॥

બોધાત્મન્યનવધિતાં ત્વયીહ જાનન્ત્યન્યાનિ ત્રિનયન સન્તુ દર્શનાનિ ।
આત્મા ત્વં તવ ચ વપુસ્ત્રયોઽપિલોકાસ્તન્માનં ત્વમિતિ ચ નાર્હતોઽસ્તિ ગર્હા ॥ ૨૬॥

ત્રૈલોક્યં વિભજતિ યો વિચિત્રતન્ત્રં યસ્માચ્ચ પ્રસરતિ સર્વજીવલોકઃ ।
ચાર્વાકાસ્તમિહ વદન્તિ યત્સ્વભાવં તર્ભઙ્ગ્યા ત્વમસિ શિવોરરીકૃતસ્તૈઃ ॥ ૨૭॥

યં માયા ક્વચિદનિરુદ્ધ્યમાનરૂપા ન સ્પ્રષ્ટું પ્રભવતિ નેતિ નેતિ સન્તઃ ।
યસ્મિંશ્ચ વ્યવહૃતિમાચરન્તિ તં ત્વાં તાત્પર્યદુપનિષદો વિભો ગૃણન્તિ ॥ ૨૮॥

એકસ્ત્વં ત્રિનયન દૃશ્યસેઽધિકર્તું જ્ઞાતું ચ ત્રિભુવનમીશ્વરઃ પ્રકાશઃ ।
તાદાત્મ્યં વિવૃતવતી વિમર્શશક્તિર્દ્વૈધેઽપિ પ્રથયતિ તે ન ભેદદોષમ્ ॥ ૨૯॥

ઇચ્છદ્ભિઃ શશિમુકુટ ક્રિયૈકરૂપં વૈવશ્યાપ્રણયવિધાયિનં વિયોગમ્ ।
નિર્વ્યૂઢશ્રુતિકવિકૃત્ય વિશ્વકર્તા ત્વં હ હર્તાભ્યુપગત એવ વેદવિદ્ભિઃ ॥ ૩૦॥

યચ્છાયાષ્ટષદભિષેકતોઽપિ સર્વે તાત્પર્યાદવસિતજાડ્યતાં ભજન્તે ।
તસ્યાત્મંસ્તવ જડતામુદીરયન્તઃ કાણાદા બત ન કથઞ્ચન ત્રપન્તે ॥ ૩૧॥

ક્વાવત્સ્યત્ક્થમજનિષ્યત પ્રકાશં પ્રાણિષ્યત્ક્થમથવૈષ જીવલોકઃ ।
આ સર્ગાદખિલજગદ્ગરિષ્ઠ નો ચેત્કારુણ્યાત્પ્રભુરભવિષ્યદષ્ટમૂર્તિઃ ॥ ૩૨॥

વક્ત્રેઽભૂત્તવ મુરજિત્પ્રતિગ્રહીતા ત્વં ગ્રીવાં સરસિજજન્મનો વ્યલાવીઃ ।
ઇત્થં તે હિમકરશેખર પ્રસાદઃ કોપો વા ક્વચિદજનિષ્ટ નો મહત્સુ ॥ ૩૩॥

ઇત્યાદિસ્તુતિમુખરેષુ નિર્જરેષુ પ્રત્યગ્રપ્રસૃતકૃપારસાતતિરેકઃ ।
તાનિત્થં કથયિતુમિન્દુખણ્ડનચૂડઃ પ્રારેભે રભસવશંવદૈર્વચોભિઃ ॥ ૩૪॥

પ્રાપ્તાનાં મમ સવિધં વિધૂતધૈર્યા ચર્યાસૌ વિપુલમુપ્લવં વ્યનક્તિ ।
વિશ્લિષ્યન્નિજમહસાં મુખાનિ યદ્વઃ પ્રાતસ્ત્યં રજનિપતિં વિડમ્બયન્તિ ॥ ૩૫॥

વિશ્વાપદ્ગદભિષજોઽપિ કિં ભવન્તો વૈક્લવ્યવ્યસનવિસંસ્થુલાનનાઃ સ્થ ।
પ્રત્યર્થિપ્રધનરસા વિલઙ્ઘ્ય દૈન્યં તેજો વસ્તુલયતિ વાડવં હિ ધામ ॥ ૩૬॥

ધ્યાનેન સ્તિમિતતમત્વમબ્જયોનેરાસીદ્યત્પ્રણિહિતદીક્ષમીક્ષણેષુ ।
ચિન્તાયાઃ પરિચયને તદેવ સદ્યઃ સાધિક્યક્રમમપિ નાધિકં ધિનોતિ ॥ ૩૭॥

સાવેગં યુધિ વલતાં દ્વિષાં શિરોભિર્યસ્યાગ્રે સમજનિ મૃત્યુભાણ્ડભઙ્ગિઃ ।
તચ્ચક્રં ક્રશિમવશંવદાગ્રિમાર્ચિઃસઞ્ચારં કિમિતિ મુરદ્વિષોઽધિશેતે ॥ ૩૮॥

યત્ર શ્રીરનિશવિનિદ્રદૃક્સહસ્રે વિશ્રમ્ય સરતિ ન પઙ્કજાકરસ્ય ।

સોઽકાણ્ડે કિમિતિ બિડૌજસોઽસ્ય દેહઃ સન્દેહં મુહુરિવ કસ્ય ન વ્યનક્તિ ॥ ૩૯॥

ચિત્રોદ્યત્કૃશિમવિરોષવવદ્ભિરઙ્ગૈર્વૈક્લવ્યં વિવૃતવતાં સમીરણાનામ્ ।
કિં ત્વેષાં પુનરપિ જાયતે મહદ્ભિર્નિઃશ્વાસૈરનલસમાંસલત્વયોગઃ ॥ ૪૦॥

પાણ્ડિમ્ના પરિચિતમુજ્ઝિતપ્રતાપપ્રાવારં કિમિતિ તથા વપુઃ ખરાંશોઃ ।
શુભ્રાંશુભ્રમઘટનાદ્વિના ત્રિયામામાતઙ્કં સૃજતિ યથા રથાઙ્ગનામ્નામ્ ॥ ૪૧॥

નિઃશેષત્રિભુવનઘસ્મરશ્રિતત્વાત્તદ્વહ્નેઃ સહજમપહ્નુતં ક્વ તેજઃ ।
યુષ્માકં સપદિ વિલોક્યતેઽસ્ય હા ધિક્ શોકોષ્ણશ્વસિતતરઙ્ગમાત્રશેષઃ ॥ ૪૨॥

ક્રાન્તાભિઃ પ્રતિદિવસાસ્તશૈલસીદચ્ચણ્ડાંશુદ્યુતિભિરિવેશ્વરઃ પ્રતીચ્યાઃ ।
યસ્તેજો દુરભિભવં બભાર સદ્યઃ સ્વાં શક્તિં દૃશિ વિધૃતામ્ભસિ વ્યનક્તિ ॥ ૪૩॥

અન્યેષાં સવનલિહામપિ પ્રયાતઃ સ પ્રાચ્યઃ ક્વ નુ નિજતેજસોઽતિરેકઃ ।
નીરન્ધ્રપ્રવિસૃમરાનનાનિલૌઘૈઃ કિં લીઢઃ કથમપિ દીપવચ્છમેન ॥ ૪૪॥

ઈદૃગ્ભિઃ સ્મરમકરૈકમાન્ત્રિકસ્ય વ્યાહારૈરપહૃતકલ્પચિત્તપીડાઃ ।
નિર્વેદાદભિમુખલોચનં કથઞ્ચિત્પ્રોત્ક્ષિપ્ય ક્ષણમવતસ્થિરે મુખાનિ ॥ ૪૫॥

દેવોઽથ શ્રુતિકવિતા પયોદનાદપ્રત્યર્થિસ્વનરચનાઞ્ચિતૈર્વચોભિઃ ।
હંસાનાં રથપથવર્તિનાં મુહૂર્તં તન્વાનો ભયમિતિ સાદરં જગાદ ॥ ૪૬॥

સન્તાપં કિમપિ વિવૃણ્વતે ન કેપાં યે પાદા ઇવ દિવિષન્મનોજ્વરસ્ય ।
સન્ત્યત્ર ત્રિનયન દુઃસહપ્રમેયા દૈતેયાસ્ત્રિભુવનશત્રવસ્ત્રયસ્તે ॥ ૪૭॥

પ્રાગુદ્યદ્યમાનિયમાદિમાંસલાભિશ્ચેષ્ટાભિસ્ત્રિદિવમુનીન્વિલઙ્ઘયન્તઃ ।
સંહત્ય સ્થિરતરનિશ્ચયેન તે મામારાદ્ધું નિરવધિ તેપિરે તપાંસિ ॥ ૪૮॥

ત્રૈલોક્યં તપસિ વિશઙ્કમેવ તેષાં કલ્પાન્તજ્વલનનયેન બાધમાને ।
નિર્વ્યાજક્રમમથ દર્શનં પુરસ્તાત્તેભ્યોઽહં વ્યતરમનુત્તરાતનુરોધઃ ॥ ૪૯॥

સન્તપ્તે વપુષિ તપોભરેણ કુર્વન્નિર્વાણં વહનપત્ત્રિપત્ત્રવાતૈઃ ।
સાવેગં પટુ ઘટિતાઞ્જલીન્પુરસ્તાત્તાનાવિષ્કૃતનિજમૂર્તિરિત્યવોચમ્ ॥ ૫૦॥

સન્તુષ્ટં નિશિતતપોવિશેષમય્યા વાસ્યા વઃ સકલમપીહ ગાત્રતન્ત્રમ્ ।
યુષ્મભ્યં વરમહમીપ્સિતં પ્રદાસ્યે ભો વત્સા ખલુ વિરચય્ય તદ્વ્રતાનિ ॥ ૫૧॥

ઈદૃક્ષપ્રતતતપઃપણમયુક્ત્યા યં પ્રાપ્તું વિવૃતદુરોદરક્રિયાઃ સ્થ ।
અર્થં તં કથયત તત્ર કાપિ મા ભૂદાશઙ્કા દિતિકુલમૌલિમણ્ડના વઃ ॥ ૫૨॥

ઇત્યસ્મદ્ગિરમધિરોપ્ય કર્ણવીથીં નેદીયઃ પ્રમદરસોક્ષિતેક્ષણાસ્તે ।
મામેવં વિનયમપાક્ષરાન્તરઙ્ગપ્રોન્મીલત્પદમગદન્વિનમ્રકણ્ઠમ્ ॥ ૫૩॥

અન્યૈઃ કિં વરદ વરાન્તરૈરવાપ્તૈરપ્રાપ્તૈરથ ચ ન કોઽપિ યૈર્વિશેષઃ ।
ત્વદ્વક્ત્રપ્રસૃતવચોમૃતૌઘલાભાદસ્માકં ભવતુ વિભો ઝગિત્યમૃત્યુઃ ॥ ૫૪॥

નૈવેદં વિતરિતુમીશ્વરોઽસ્તિ કશ્ચિન્નિશ્ચિત્ય દ્રુતમિતરં વરં વૃણીધ્વમ્ ।
ઇત્યસ્મદ્વચનમથોચ્ચુલુમ્પ્ય તેઽત્ર શ્રોત્રાભ્યાં પુનરિદમાદરાદવોચન્ ॥ ૫૯॥

નેવં ચેત્પ્રતિશૃણુતે ભવાનકસ્માદસ્મભ્યં દૃઢતપસાપિ નિઃસહેભ્યઃ ।
તહ્યેર્કો યુધિ રિપુણા શરોઽર્પ્યમાણઃ સર્વેષાં ભવતુ સદૈવ મૃત્યવે નઃ ॥ ૫૬॥

મત્તસ્તં વરમિતિ દીપ્તમાપ્તવન્તસ્તે યુક્ત્યા મતિમતિવર્તિતું યમસ્ય ।
ત્રીંલ્લોકાનથ ચ પૃથક્પૃથઙ્નિરોદ્ધું સન્નદ્ધા વ્યધિષત નૂત્નયત્નસિદ્ધિમ્ ॥ ૫૭॥

તત્ત્વમાન્તરમવેત્ય તતઃ સુવર્ણદુર્વર્ણલોધટનાવિકટૈઃ પ્રકારૈઃ ।
તેભ્યઃ પૃથક્ત્રિષુ જગત્સુ પુરીરનલ્પશિલ્પાવિકલ્પસમયઃ સ મયશ્ચકાર ॥ ૫૮॥

અરૂણમણિગરીયોગો પુરપ્રોજ્જિહાન-
દ્યુતિનિવહનવીનોટ્ટઙ્કિતાગ્રેયવપ્રમ્ ।
પુરવરમથ હૈમં દૈત્યનારીકટાક્ષૈઃ
કુવલયિતગવાક્ષં તારકાક્ષોઽધ્યરુક્ષત્ ॥ ૫૯॥

ધવલભવનયોગાદાપ્તપર્યાપ્તસામ્ય-
શ્રિણિ નભસિ હસન્ત્યામુલ્લસદ્ભિમયૂખૈઃ ।
પુરિ પરિકરમાધાદ્રાજતોલ્લાસબન્ધૌ
સ્વક ઇવ કમલાક્ષઃ પ્રક્રમો વિક્રમસ્ય ॥ ૬૦॥

ભરત્રુટ્યત્ક્ષોણીતલવિસૃતપાતાલતિમિર-
સ્થિરાસઙ્ગેનેવ સ્ફુરદસિતનિઃશેષવપુષમ્ ।
નૃણાં કે કાલાયસમયમયાત્નાજ્જનપદં
તતો વિદ્યુન્માલીત્યસિસલિલધારાભિરસિચત્ ॥ ૬૧॥

તે પ્રાપ્ય ત્રિપુરપ્રથામથ પૃથગ્લોકાન્નુજન્તઃ સ્થિતા
દિવ્યાન્યબ્દશતાયુતાન્યુપનમદ્વિશ્વાપમૃત્યુશ્રિયઃ ।
યન્નામ્નાપ્યાધિરોહતા શ્રુતિપદં ગીર્વાણવામભ્રુવાં
ગાહન્તે તનવોઽતિવેલપવનોદ્વેલ્લલ્લતાસૌહૃદમ્ ॥ ૬૨॥

તાપં રુચિક્ષતિમથો વિવિધાશ્ચ પીડા

વિશ્વસ્ય ધાતવ ઇવોત્કુપિતાસ્ત્રયસ્તે ।
આતન્વતે સપદિ દુઃસહસન્નિપાતે
તસ્મિન્ભિષક્તુ યાદે ભર્ગ ભવત્પ્રસાદઃ ॥ ૬૩॥

યાઃ ક્રીડદ્વિબુધાવરોધનપરિષ્કારાર્કકાન્તાનલ-
જ્વાલાતાપલવાવલેહમપિ નો મધ્યેદિનં સેહિરે ।
તાઃ સન્તાનકવીરુધો વિધુનિતાસ્તત્સૈનિકૈઃ સામ્પ્રતં
દાવાગ્નિર્યદિ નામ રક્ષતિ તતો નીચાવમાનજ્વરાત્ ॥ ૬૪॥

પાશૈર્બદ્ધશિરોધરાઃ ફણિમયૈરુત્ખાતનાકિદ્રુમ-
સ્કન્ધાછાનતલેષુ દાનસલિલાવગ્રાહિણો દિગ્દ્વિપાઃ ।
નીતાસ્તૈરજિરેષુ યામગજતાં સ્રસ્તેઽપિ વિશ્વમ્ભરા-
ભારે વ્રીડનિપીડનેન દધતે દૂરાવનમ્ર શિરઃ ॥ ૬૫॥

કિં વાન્યત્તે તથાદ્ય ત્રિનયન વિનયાતિક્રમાક્રાન્તવિશ્વા
નિઃશ્વાસૌઘેન દીર્ઘીકૃતચમરમરુડ્ડમ્બરાઃ સ્વર્વધૂભિઃ ।
સર્વં નિર્વીરમુર્વીતલમથ નિલયં નાકિનાં મન્યમાનાઃ
કર્તારો નૂનમસ્મત્પરિકરમચિરાન્નામમાત્રાવશેષમ્ ॥ ૬૬॥

ઇત્થં પ્રસ્તાવનાયૈ વિવૃતવતિ વચઃ પદ્મભૂસૂત્રધારે
તૂર્ણં વક્ત્રપ્રસાદપ્રસ્રજવનિકામગ્રતોઽપાસ્ય દૂરમ્ ।
ક્રોધાખ્યઃ પર્ષદાનાં વિદધદધિમનોરઙ્ગપીઠપ્રવેશં
શૈલૂષો દૃષ્ટહસ્તાદ્યસમવિકૃતિભિઃ સઙ્ગમઙ્ગીચકાર ॥ ૬૭॥

॥ ઇતિ શ્રીમઙ્ખકસ્ય કૃતૌ શ્રીકણ્ઠચરિતે મહાકાવ્યે પરમેશ્વરદેવસમાગમવર્ણનમ્ ॥

॥ શ્રીમઙ્ખકકવિવિરચિતં શ્રીકણ્ઠચરિતમ્ । સપ્તદશઃ સર્ગઃ ॥

.. shrImankhakakavivirachitaM shrIkaNThacharitam . saptadashaH sargaH ..

Notes:

Śrīkaṇṭhacaritam શ્રીકણ્ઠચરિતમ્ is a Saṃskṛta Mahākāvya સંસ્કૃત મહાકાવ્ય composed by Mahākavi Maṅkhaka મહાકવિ મઙ્ખક - a 12th century poet from Kashmir. The 25 sections of the Mahākāvya મહાકાવ્ય describe the incidence of Tripuradāha ત્રિપુરદાહ and the annihilation of Tripurāsura ત્રિપુરાસુર by Śrīkaṇṭha શ્રીકણ્ઠ (Śiva શિવ).

Sarga 17 સર્ગ ૧૭ describes the meeting of the deva-s દેવાઃ with Śrīkaṇṭha શ્રીકણ્ઠ (Śiva શિવ) at Kailāsa કૈલાસ, wherebey they eulogise and apprise Him about the menace created by Tripurāsura ત્રિપુરાસુર.

Encoded and proofread by Ruma Dewan

---

*ParameshvaradevasamagamavarNanam from Shrikanthacharitam*

pdf was typeset on October 7, 2023

Please send corrections to *sanskrit@cheerful.com*